KÂVYAMÁLÂ. 80.

THE

PṚÂCHÎNA-LEKHA-MÂLÂ

OR

A COLLECTION OF

Ancient Historical Records.

Vol. III.

EDITED BY

PAṆḌIT BHAVADATTA S'ÂSTRÎ,

Son of

MAHÂMAHOPÂDYÂYA PANDIT S'IVADATTA

AND

KÂS'ÎNÂTH PÂNDURANG PARAB.

PRINTED AND PUBLISHED

BY

TUKÂRÂM JÂVAJÎ,

PROPRIETOR OF JÂVAJÎ DÂDÂJÎ'S 'NIRNAYA-SÂGARA' PRESS.

BOMBAY.

1903

Price 1 Rupee.

(Registered according to Act XXV of 1867)

(All rights reserved by the Publisher)

काव्यमाला. ८०.

प्राचीनलेखमाला ।

(तृतीयो भागः ।)

जयपुरमहाराजाश्रितमहामहोपाध्यायपण्डितदुर्गाप्रसाददारककेदारनाथ-
कृपाङ्गीकृतशोधनकर्मणा
महामहोपाध्यायपण्डितशिवदत्तशर्मतनूजपण्डितभवदत्तशास्त्रिणा,
मुम्बापुरवासिपरबोपाह्वपाण्डुरङ्गात्मजकाशीनाथशर्मणा च
संशोधितः ।

स च
मुम्बय्यां निर्णयसागराख्ययन्त्रालये तदधिपतिना मुद्राक्षरैरङ्कयित्वा
प्राकाश्यं नीतः ।

१९०३

(अस्य ग्रन्थस्य पुनर्मुद्रणादिविषये सर्वथा निर्णयसागरमुद्रायन्त्रालयाधिपतेरेवाधिकारः ।)

मूल्यमेको रूप्यकः ।

प्राचीनलेखमालाया अनुक्रमणी ।

लेखाङ्काः ।		पृष्ठम् ।
१२५.	दूधपानीघाटे श्रीमदुदयमानराज्यप्राप्तिप्रशस्तिलेखः	१
१२६.	कामरूपविषयाधीश्वरश्रीवैद्यदेवमहाराजानां शासनप्रशस्तिः	४
१२७.	कान्यकुब्जाधीश्वरश्रीमदनपालतनयश्रीगोविन्दचन्द्रमहाराजपुत्राणां शासनपत्रम्.	९
१२८.	मोकलमहाराजकारितशिवमन्दिरप्रशस्तिः	१२
१२९.	श्रीकुन्तीमाधवभगवन्मन्दिरस्तम्भोत्कीर्णा प्रशस्तिः	२४
१३०.	श्रीशीलादित्यमहाराजनिर्मापितवापीप्रशस्तिपत्रम्	३४
१३१.	मल्लिदेवमन्यसत्यमहाराजयोः प्रशस्तिपत्रम्.	३९
१३२.	श्रीवेङ्कटपतिरायशासनपत्रम्	४५
१३३.	श्रीकर्णमहाराजानां शासनपत्रम्	५२
१३४.	बाईश्रीहरीरकारितवापीप्रशस्तिः	५८
१३५.	दीर्घसीनगरीस्थितवनपतिमहाराजकरितनाट्यशालाप्रशस्तिः	५९
१३६.	श्रीकाटयवेममहाराजधर्मपत्नीमल्लाम्बिकाकारितमार्कण्डेयशिवालयाग्रहारप्रशस्तिः	६१
१३७.	श्रीसुन्दरपाण्ड्यमहाराजकारितश्रीरङ्गनाथभूषणादिप्रशस्तिः	६५
१३८.	अनन्तवर्ममहाराजकारिततडांकप्रतिष्ठाप्रशस्तिः....	७०
१३९.	श्रीवीरबुक्कमहाराजभ्रातृजश्रीसंगममहाराजानां शासनपत्रम्	७१
१४०.	श्रीवीरबुक्कमहाराजप्रपौत्रवीरविजयमहाराजपुत्रश्रीदेवरायमहाराजानां शासनपत्रम्	७६
१४१.	श्रीमाधववर्ममहाराजानां शासनपत्रम्	८०
१४२.	धारानगराधीश्वरजयसिंहमहाराजानां शासनम्.	८३
१४३.	श्रीअन्नवेमभूपतेः शासनपत्रम्....	८५
१४४.	श्रीजायचमूपतिकारितगणपतीश्वरप्रतिष्ठाशासनम्	८८
१४५.	श्रीवेमहाराजमहिषीगणपाम्बादत्ताग्रहारप्रशस्तिः	९३

लेखाङ्काः ।		पृष्ठम् ।
१४६.	सायणमाधवाश्रयश्रीबुक्कमहाराजतनयहरिहरमहाराज-शासनम्	९६
१४७.	इन्द्रवर्मणोऽच्युतपुरोपलब्धशासनम्	१०१
१४८.	श्रीगुणार्णवसूनुदेवेन्द्रमहाराजानां चिक्कोलग्रामोपलब्धं शासनम्	१०२
१४९.	श्रीवेङ्कटपतिदेवमहाराजदत्तकूनियुरग्रामशासनम्	१०४
१५०.	श्रीमदन्नवेममहाराजदत्तवेमपुराग्रहारशासनम्	११६
१५१.	द्वितीयपुलिकेशिन्नपराभिधानश्रीसत्याश्रयमहाराजानां शासनपत्रम्	११९
१५२.	गुर्जरदेशाधिपतिश्रीगोविन्दराजमहाराजानां शासनपत्रम्	१२१
१५३.	अल्लपडोड्डराज्ञस्ताम्रपत्रम्	१२३
१५४.	वीरतोडमहीपतेस्ताम्रपत्रम्	१३२
१५५.	श्रीमज्जायमहाराजानां शिलालेखः	१४४
१५६.	तृतीयकृष्णमहाराजानां दानपत्रम्	१४८
१५७.	अमरनाथमन्दिरस्तम्भोत्कीर्णशासनद्वयम्	१५२
१५८.	काङ्करोलीग्रामीयराजसागराख्यतडागस्थो लेखः	१५८
१५९.	काङ्करोलीग्रामीयराजसागराख्यतडागस्थो लेखश्चतुर्थः	१६२
१६०.	आदिनाथजैनमन्दिरस्थस्तम्भशिलालेखः	१६५
१६१.	निकुम्भवंशीयश्रीमद्भोवनमहीपालानां दानपत्रम्	१६६
१६२.	प्रशान्तरागापरनामधेयश्रीमद्दद्महाराजानां तृतीयं दानपत्रम्	१६९
१६३.	वलभीप्रभोर्महाराजगुहसेनस्य दानपत्रम्	१७१
१६४.	वलभीप्रभोः श्रीधरसेनमहाराजानां द्वितीयं दानपत्रम्	१७३
१६५.	वलभीप्रभोः श्रीधरसेनमहाराजानां तृतीयं दानपत्रम्	१७५
१६६.	वलभीप्रभोः श्रीधरसेनमहाराजानां चतुर्थं दानपत्रम्	१७८
१६७.	वलभीप्रभोः श्रीखरग्रहमहाराजानां दानपत्रम्	१८१

लेखाङ्काः । पृष्ठम् ।
१६८. गिरनारपर्वतस्थवस्तुपालतेजःपालजीर्णोद्धृतजैनमन्दिरस्थः
प्रथमः शिलालेखः १८५
१६९. गिरनारपर्वतस्थवस्तुपालतेजःपालजीर्णोद्धृतजैनमन्दिरस्थो
द्वितीयः शिलालेखः १८७
१७०. गिरनारपर्वतस्थवस्तुपालतेजःपालजीर्णोद्धृतजैनमन्दिरस्थ-
स्तृतीयः शिलालेखः १९०
१७१. गिरनारपर्वतस्थवस्तुपालतेजःपालजीर्णोद्धृतजैनमन्दिरस्थ-
श्चतुर्थः शिलालेखः १९४
१७२. गिरनारपर्वतस्थवस्तुपालतेजःपालजीर्णोद्धृतजैनमन्दिरस्थः
पञ्चमः शिलालेखः १९७
१७३. गिरनारपर्वतस्थवस्तुपालतेजःपालजीर्णोद्धृतजैनमन्दिरस्थः
षष्ठः शिलालेखः २००

प्राचीनलेखमाला ।

(१२५)

दूधपानीघाटे श्रीमदुदयमानराज्यप्राप्तिप्रशस्तिलेखः[1] ।

ओम् ।

श्रीरात्मदेहप्रतिमासहस्रमालोक्य भोगी[न्द्रफ]णामणिस्थम् ।
ई[र्ष्याकु]ला करतलेन हरेः प्रहा[र] मुल्ला[सय]न्ती भवतु [श्रि]ये वः ॥
बभूव पूर्वं मगधाधिराजः श्रीआदिसिङ्घो(सिंहो)ऽरिगजैकसिङ्घः(सिंहः) ।
पराक्रमैर्यः प्रथितोऽद्वितीयः श्रीमज्ज[रासं]ध इव द्वितीयः ॥

अस्यां भ्र[म]रशाल्मल्यां छिङ्गलायां [त]थैव च ।
नभूतीष[ण्ड]के चापि बभूवाधिपतिः पुरा ॥
अथ कस्मिंश्चि[त्स]मये वणिजो भ्रातरस्त्रयः ।
तामलिप्ति[म]योध्याया ययुः पूर्वं वणिज्यया ॥
भूयः प्रतिनिवृत्तास्ते स्वमावासं यियासवः ।
प्रयोजनेन केनापि चिरं चक्रुरिह स्थितिम् ॥
सुवर्णमणिमाणिक्यमुक्ताप्रभृति यैर्धनम् ।
वित्तपस्पर्धयेवासीदपर्यन्तमुपार्जितम् ॥
सर्वभूताश्रयाः सत्यदयादाक्षिण्यशालिनः ।
स्रष्टार इव लोकस्य त्रयः क्षितिमुपागताः ॥

---

१. लेखोऽयं गयाक्षेत्रतो दक्षिणस्या दिशि हजारीबागप्रान्ते दमदमापार्श्वे दूधपानीघाटे A. Cunningham महाशयेनोपलब्धः Professor F. Kielhorn, Ph. D., C. I. E. महाशयेन व्याख्यातः. स्पष्टतया कालनिश्चयो न जातः

कैलासः कठिनः कलङ्कमलिनश्चन्द्रस्तुषाराचलः
प्रायस्तीक्ष्णकरप्रहारविवशो नित्यं गलत्येव हि ।
तारल्यं च समाश्रिता गुणवतो(युता) हारा इति प्रायशो
येषामत्र बभूव निर्मलगुणैः शीलस्य नैवोपमा ॥
दातृत्वेन समो बभूव न पुरा कर्णोऽपि येषामसौ
शौर्येणापि जगज्जिगीषुरगमन्नैवार्जुनस्तुल्यताम् ।
ये चासह्यपराक्रमक्रमपदाक्रान्तत्रिलोकीतला
वीरानाहवमूर्धसु प्रबलिनः पङ्क्तूनिवोच्चिक्षिपुः ॥

दिक्कामिनीतनुविलेपनचन्दनानि
राज्यश्रियः स्तनतटीविकटांशुकानि ।
अद्यापि चन्द्रकरहारतुषारभांसि
सर्वा दिशो धवलयन्ति यशांसि येषाम् ॥

विद्यासमुन्नतगुणा अपि न [स्मयान्धा]
नम्राः सुदूरमथ चोन्नतमूर्तिभाजः ।
निस्त्रिंशनिष्ठुरकराः कृपयाकुलाश्च
ये चार्थिकल्पतरवः शिवशौरिभक्ताः ॥

स श्रीमानादिसिङ्घो(सिंहो)ऽथ कदाचिदटवीमिमाम् ।
प्रारब्धी खेलनोद्युक्तः प्रविवेशावनीश्वरः ॥
आदिदेश समाहूय स पल्लीत्रितयाज्जनम् ।
यूयमद्यावलगकमस्मभ्यं ददताश्विति ॥
अत्रत्यस्तत्समाकर्ण्य [तूर्णं] बलपरिग्रहः ।
वणिजां भ्रातरं ज्येष्ठमुदयमानमुपागमत् ॥
राज्ञोऽवलगनार्थाय तमभ्यर्थ्य प्रयत्नतः ।
प्रेषयामास तं सोऽपि वल्लभोऽभून्महीपतेः ॥

अल्पैरहोभिरनुभूय नृपप्रसादं
श्रीपट्टबन्धमधिगम्य ततः क्रमेण ।

श्रीआदिसिङ्ह(सिंह)नृपतिं परिबोध्य तेन
संमानितो भ्रमरशाल्मलिपल्लिलोकः ॥
तुष्टास्ततो भ्रमरशाल्मलिवासिनस्ते
भूयस्तमागतमुपेत्य जनाः प्रणम्य ।
राजा भव त्वमिह पालय पल्लिमेता-
मित्यादि तत्परधियोऽभिदधुस्तमुच्चैः ॥
एवं नाम भवत्विति प्रतिवचस्तस्मात्समाकर्ण्य ते
तस्मै राज्यपदं ददुः क्षितिभृताप्याज्ञापितास्तत्कृते ।
सोऽस्मिन्विक्रमखण्डितारिसुभटश्रेणिः श्रुतार्थश्चिरं
राज्यं निर्जितसर्वपल्लिरकरोन्नाम्नोदयाख्यो नृपः ॥
यस्य त्यागनयान्वयोन्नतिगुणग्रामाधिपत्यार्जितां
कीर्तिं चन्द्रकरावदातसुभगामद्यापि सोत्कण्ठिताः ।
गेहासीनसुराङ्गनाजनकृतप्रीतिं सुरेन्द्रालय-
प्रान्तप्रोत्थितकल्पपादपतले गायन्ति सिद्धस्त्रियः ॥
आगत्योदयमानस्तु तैरेवाभ्यर्थितस्तदा ।
पल्लीद्वयेऽपि राज्यार्थं भ्रातरौ विससर्ज सः ॥
श्रीमाञ्छ्रीधौतमानाख्यः प्रख्यातो [न]भूतिषण्डके ।
वश्यात्मोदयमानस्य चिरं राज्यमचीकरत् ॥
प्रचण्डसुभटाटोपः खण्डितामित्रमण्डलः ।
अभूदजितमानोऽपि च्छिङ्गलायां महीपतिः ॥
पत्युर्भ्रमरशाल्मल्याच्छिङ्गला[न]भूतिषण्डकौ ।
वश्यौ बभूवतुः पूर्वमेवमेतौ यथाक्रमम् ॥
आरभ्योदयमानमादिपुरुषं गोत्रक्रमोऽयं महा-
नस्माकं परिवर्धमानमहिमेत्यालोक्य ते पूर्वजाः ।
असद्गोत्रभवात्कदाचिद्‌····नाद्वयु(१)त्थानिकं स्यादिदं
सत्पल्लीद्वयमित्यवेत्य चखनुः(१) प्राशस्त्यवर्णानिमान् ॥

यावत्प्रान्तमरीचिरेचकचयव्याप्तत्रिलोकोच्छ्रयं
चक्रं चक्रधरो बिभर्ति गिरिशो यावद्भवानीपतिः ।
यावल्लोकसिसृक्षयाकुलमिलच्चिन्तालसश्चात्मभू-
र्गोत्रस्योदयमानदेवनृपतेस्तावत्स्थितिर्दृश्यताम् ॥

(एपिग्राफिआ इण्डिका—२।३४५-३४७)

---

(१२६)

कामरूपविषयाधीश्वरश्रीवैद्यदेवमहाराजानां शासनप्रशस्तिः ।[1]

ओं नमो भगवते वासुदेवाय । स्वस्ति ॥

अम्बरमानस्तम्भः कुम्भः संसारबीजरक्षायाः ।
हरिदन्तरमितमूर्तिः क्रीडापोत्री हरिर्जयति ॥
एतस्य दक्षिणदशो वंशे मिहिरस्य जातवान्पूर्वम् ।
विग्रहपालो नृपतिः सर्वाकारर्धिसंसिद्धः ॥
यस्य वंशक्रमेणाभूत्सचिवः शास्त्रवित्तमः ।
योगदेव इति ख्यातः स्फुरद्दोर्दण्डविक्रमः ॥
तस्योर्जस्वलपौरुषस्य नृपतेः श्री**रामपालो**ऽभव-
त्पुत्रः पालकुलाब्धिशीतकिरणः साम्राज्यविख्यातिभाक् ।
तेने येन जगत्त्रये जनकभूलाभाद्यथावद्यशः
क्षोणीनायकभीमरावणवधाद्युद्धार्णवोल्लङ्घनात् ॥
यस्य शुद्धसचिवः पुराभवद्बो**धिदेव** इति तत्त्वबोधभूः ।
विश्व(ष्व)गेव विदितोऽद्भुतैर्गुणैरुज्झितात्मसदृशः क्षितावयम् ॥
अस्य **प्रतापदेवी** पत्नी धर्मर्द्धिकीर्तिविश्रान्तिः ।
आसीदसीमकान्तिः संतोषस्याकृतिः पत्युः ॥

---

१ प्रशस्तिरिय Mr R H. Brereton महाशयेन वाराणस्यध्यक्षेण लब्धा Mr. Arthur Venis, M. A. महाशयेन वाराणसीविश्वविद्यालयाध्यक्षेण प्रकाशिता.

अभूदमुष्यां तनयोऽस्य विश्रुतः श्रीवैद्यदेवः परया श्रिया युतः।
यदुच्छलत्कीर्तिश(स)रोवरोद[रे] पद्माङ्कुराभः शिवभूधरोऽभवत् ॥
दैवज्ञेषु च तर्कुकेषु च जनुर्दिष्टस्य दिष्टिश्रुते-
रन्नस्वप्नधृतीर्झटित्यरिभटैरुन्मुच्य संमूर्छितम् ।
किं चैतन्निजबन्धुवृन्दनयनप्रोद्भूतहर्षाम्बुभिः
पारक्यप्रसरप्रतापदहनस्याभूद्विनिर्वापणम् ॥
सोऽयं **रामनरेन्द्रज**स्य सचिवः साम्राज्यलक्ष्मीजुषः
प्रख्यातस्य **कुमारपाल**नृपतेश्चित्तानुरूपोऽभवत् ।
यस्यारातिकिरीटहाटककृतप्रासादकण्ठीरव-
ग्रासत्रासवशादपैष्यति विधोर्बिम्बाङ्करूपी मृगः ॥
सचिवसमाजश(स)रोजतिग्मभानुः प्रसरयशोम्बुधिरेष **वैद्यदेवः** ।
सहजवदान्यतयैव चम्पकेशः सुजनमनःकुमुदेषु शीतरश्मिः ॥
यस्यानुत्तरवज्रसंगरजये नौवाटहीहीरव-
त्रस्तैर्दिक्करिभिश्च यन्न चलितं चेन्नास्ति तद्गम्यभूः ।
किं चोत्पातुककेनिपातपतनप्रोत्सर्पितैः शीकरै-
राकाशे स्थिरता कृता यदि भवेत्स्यान्निष्कलङ्कः शशी ॥
गौडेशस्य कुमारपालनृपतेर्दोर्वीर्यतेजस्पते-
स्त्रैलोक्योदरपूरिभूरियशसः प्रज्ञानवाचस्पतेः ।
सप्ताङ्गक्षितिपाधिपत्वमभितः संचिन्तयन्नग्रधीः
प्राणेभ्योऽप्यतिबन्धुरस्य सचिवः सोऽभूद्रुणिग्रामणीः ॥
एतादृशो हरिहरिद्भुवि सत्कृतस्य
श्रीतिङ्गदेवनृपतेर्विकृतिं निशम्य ।
गौडेश्वरेण भुवि तस्य नरेश्वरत्वे
श्रीवैद्यदेव उरुकीर्तिरयं नियुक्तः ॥
स्रजमिव शिरस्यादायाज्ञां प्रभोरुरुतेजसः
कतिपयदिनैर्दत्वा जिष्णुः प्रयाणमसौ द्रुतम् ।

तमवनिपतिं जित्वा युद्धे बभूव महीपति-
निंजभुजपरिस्पन्दैः साक्षाद्विवस्पतिविक्रमः ॥
एतस्य प्रवरप्रयाणसमये पांशूत्करैः स्थण्डिल-
प्राये व्योमतलेऽर्कसप्तिकगणैर्लब्धोऽङ्घ्रियानश्रमः ।
किं चाक्षिद्वयगोपनेन करयोरन्यक्रियास्वक्षमः
सुत्रामा नयनानिमीलनकरं कर्म स्वकं निन्दति ॥
दोर्दण्डारणिजे हविर्भुजि भटव्रातेन्धनैरेधिते
संग्रामाध्वरपूजिते रिपुशिरःश्रेणीलसच्छ्रीफलैः ।
कृत्वा होमविधिं परक्षितिभुजा दत्त्वाथ पूर्णाहुतिं
लब्धोदग्रयशो महत्फलमसौ श्रीवैद्यदेवो बभौ ॥
यदुरुसमरमध्यात्खड्गघातोत्पतद्भिः
परसुभटशिरोभिर्व्योम कीर्णं निरीक्ष्य ।
झटिति विसरराहुव्य(व्यू)हधीबिभ्यदर्कः
स्वरुचमपि रजोभिः प्रोञ्छयन्स्वं जुगोप ॥
चन्द्रस्योद्भवभूर्महीध्रस(श)रणं सत्त्वप्रधानाशयः
पात्रश्रीमहितः स्फुरद्रसमयः सोऽयं गभीरः परः ।
रत्नानां निलयः श्रियः कुलगृहं स्वान्तस्थितश्रीपतिः
स्यादेवं सदृशोऽम्बुधेर्यदि जलाधारोऽथवा लङ्घितः ॥
ज्ञानैर्गीष्पतिरूर्जितैर्दिनपतिः सत्पौरुषैः श्रीपति-
र्धैर्यैरम्बुपतिर्धनैर्धनपतिर्दानैः स चम्पापतिः ।
किं चैतेऽपि गिरोपमानविषयाः प्रायः प्रसिद्धेर्बला-
द्भूमः किंतु वयं स्वयं स्वसदृशः सर्वैर्गुणानां गणैः ॥
यस्य श्रीबुधदेव इत्यनुजभूः श्रीरामभद्रानुज-
प्रायस्तत्तदसीमनिर्मलगुणैर्धर्मर्द्धिशीलर्द्धिभूः ।
दानैः शोभनपल्लवैर्द्विजकुलप्रीतिप्रदानैरपि
ख्यातः कल्पमहीरुहप्रतिकृतिर्दोर्वीर्यचञ्चद्यशाः ॥

अथाभवत्कौशिकसञ्ज्ञको मुनिर्मुनीन्द्रमुख्यो निजगोत्रपूरुषः ।
पयोजजन्मास्यचयभ्रमश्रमाद्यदास्यपद्मे तु सुखं गिरा स्थितम् ॥
एतद्वंशे महति **भरतः** प्रादुरासीद्द्विजाति-
भाविग्रामे प्रविसरयशाः शासनोऽग्रे वरेन्द्याम् ।
आस्तामन्यद्गुणगणसमाख्यानमाख्यानमात्रा-
द्यन्नाम्नोऽपि स्फुटति निखिलः कण्णिशानां(किल्बिषाणां)प्रपञ्चः॥
अस्य विप्रतिलको **युधिष्ठिरः** पुत्र इत्यभवत्सुधीश्वरः ॥
शास्त्रवेदपरिशुद्धबोधभूः श्रोत्रियत्वविलसद्यशोनिधिः ॥
पाईति धर्मपत्नी धीरवरस्यास्य चित्तविश्रान्तिः ।
अ[ा]सीदसीमकान्तिः शीलौदार्यश्रियां वसतिः ॥
पूर्वपूर्वजनुर्जन्मकर्मपाकादभूत्सुतः ।
तस्यैतस्यां द्विजाधीशपूज्यः श्री**श्रीधरः** परः ॥
तीर्थेषु भ्रमणाच्छ्रुताध्ययनतो दानात्तथाध्यापना-
द्यज्ञानां करणाद्व्रतैकचरणात्सर्वोत्तरः श्रोत्रियः ।
प्रातर्नक्तमयाचितोपवसनैर्येन स्वयं गुग्गुलो-
राकर्षाद्वरदः कृतोऽत्र हि कलौ श्री**सोमनाथः** प्रभुः ॥
कर्मब्रह्मविदां मुख्यः सर्वाकारतपोनिधिः ।
श्रौतस्मार्तरहस्येषु वागीश इव विश्रुतः ॥
एतस्मै शासनं प्रादाद्वै**द्यदेव**क्षितीश्वरः ।
वैशाखे विशु(षु)[व]त्यां च स्वर्गार्थं हरिवासरे ॥

स्वस्ति हंसाकाञ्चीसमावासितश्रीमज्जयक(स्क)न्धावारात्परम[माहे]श्वरः परमवैष्णवः महाराजाधिराजः परमेश्वरः परमभट्टारकः श्रीमान्वै**द्यदेव**देवः कुशली श्री**प्राग्ज्योतिष**भुक्तौ **कामरूप**मण्डले **वाडा**विषये भट्टगङ्गाधर-भुक्तक**शा(स)न्तिवाडा**मन्दरा[ग्रा]मीययथाप्रधानप्रतिवासिचट्टभट्टविसयि-लङ्कादिजनपदान् कर्षकांश्च यथात्यागं मानयति बोधयति समादिशति वः—'मतमस्तु भवताम्—'एतद्वयं चतुःसीमावच्छिन्नं परिबोधशुद्धम्

१. अद्वंशे तु सर्वत्र सीमाशब्दस्तालव्यादिरेव दृश्यते.

अचट्टभट्टप्रवेशं सजलस्थलं भूच्छिद्रं चाकिंचित्करग्राह्यं चतुर्थाब्द सं वैशाखप्रथमादिना गुग्गुली श्रीश्रीधरशर्मणे चतुःशतिकं शासनीकृत्य प्रदत्तमस्माभिः । तदेतस्मिन्विधेया भवेत' इति । सं ४ सूर्यगत्या वैशाखदिने १ नि ॥०॥ **सन्तिवडामन्दरा**ग्रामयोरेकीभूयाष्टसीमान्वितयकृतः । पूर्वदिशस्तावद्दिग्दाण्डिधरमादाय यावत् पश्चिमकूलसीमा । ऐशानदिशः शिङ्गिआधरसीमालेङ्गवडाभोग्येकंसपलभू १॥ उत्तरदिशः कोण्टुवाडोङ्गीनडजोलीनवधरासीमा । शिरवडाशिलगुडिभोग्यं किंचिदतिक्रम्य जयरातिपोला उणैपोलाविरामादाय वायव्यदिशः पिपामुण्डा अश्वत्थसीमा अझडाचौवोल वुडिपोखि रिपूर्वधरकुलाचापडि अष्टबलपुराणधर्मालि पश्चिमायावत् । पश्चिमदिशः सीमा किंचिद्धरक्त्वा नैर्ऋत्यदिशो धम्मालिमादाय नैपोश्रृङ्गारयो विवादभूमेर्वाट्यर्धमादाय लच्छुवडास्थितैकवाटीसमेतघाटचम्पकः सीमा वेलवणीपटानवपल । दक्षिणदिशः कुम्भकारभोग्यबहिःसीमा कोण्टोहाडाद्भवोलयावत् हेलावणामुण्डमादाय दिग्दाण्डि यावत् अग्निदिशः सीमा । एवमष्ट सीमा द्वितीयपटकस्य चतुर्दशपङ्क्त्याः(?) ॥

सन्तिपाटकसंज्ञं तु **मन्दरा**ग्रामसंयुतम् ।
व(वा)डाविषयसंबद्धं भूच्छिद्रेणेति निश्चयात् ॥
सर्वायोपायसंयुक्तं करोपस्करवर्जितम् ।
यावच्चन्द्रार्कसंभोग्यं यावदिच्छाक्रियाफलम् ॥
जलस्थलखिलारण्यवाटगोवाटसंयुतम् ।

कोष्ठ(ष्ठे) यश्च करिस्य(ष्य)ति स्वयमिदं यः कारयिस्य(ष्य)त्यसौ
पुण्यादिक्षयमभ्युदीक्ष्य निरये कल्पान्तरं स्थास्यति ।
यः श्लाघ्यः परिपा[लयि]स्य(ष्य)ति सुतैर्वित्तैः स वर्धिस्य(ष्य)ते
स्वर्लोकं परिभुज्य यास्यति चिराद्विष्णोर्वरेण्यं पदम् ॥
यावद्भास्करहिमकरताराभूधरप[यो]धिवसुधाद्याः ।
तावद्विलश(स)तु नृपतेः कीर्तिः श्रीवैद्यदेवस्य ॥
इमां राजगुरोः पुत्रः श्रीमुरारेर्द्विजन्मनः ॥
पद्मागर्भोद्भवश्चक्रे प्रस(श)स्तिं श्रीमनोरथः ॥

देवोऽयं रिपुचक्रविक्रमकथाप्रत्यर्थिदोर्विभ्रमः
शश्वद्विश्वपरिभ्रमन्नवनवोन्मीलद्यश[ः]: **श्रीधरः**।
एतस्मै मुदितो द्विजातिपतये धर्माधिकारार्पित-
श्री**गोनन्दन**कोविदैकवचसा प्रादादिदं सा(शा)सनम् ॥
कर्णभद्रेण भद्रेण शिल्पिनानल्पबुद्धिना।
ताम्रं विनयनम्रेण निर्मितं साधुकर्मणा ॥

एतादृशे मुनिवचनानि भवन्ति—

स्वदत्तां परदत्तां वा यो हरेत वसुंधराम्।
स विष्टायां कृमिर्भूत्वा पच्यते पितृभिः सह ॥
गामेकां स्वर्णमेकं वा भूमेरप्यर्धमङ्गुलम्।
हरन्नरकमाप्नोति यावदाभूतसंप्लवम् ॥
बहुभिर्वसुधा दत्ता राजभिः सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥

(एपिग्राफिआ इण्डिका—२।३५०–३५४)

---

(१२७)

कान्यकुब्जाधीश्वरश्रीमदनपालतनयश्रीगोविन्द-चन्द्रमहाराजपुत्राणां शासनपत्रम्।[1]

ॐ नमो भगवते वासुदेवाय।
तमाद्यं सर्वदेवानां दामोदरमुपास्महे।
त्रैलोक्यं यस्य वक्तीव क्रोडान्तःस्थं वलित्रयी ॥
वंसे(शे) **गाहडवाला**ख्ये बभूव विजयी नृपः।
महीमलसुतः श्रीमान्नलनाभागसंनिभः ॥

---

१. पत्रमिदं Mr. R. F. Brereton महाशयेन वाराणस्यध्यक्षेण Arthur Venis M. A. संज्ञकस्य वाराणसीविश्वविद्यालयाध्यक्षस्य पार्श्वे प्रेषितं तेन च प्रकाशितम्.

याते श्रीभोजभूपे विबुधवरवधूनेत्रसीमातिथित्वं
श्रीकर्णे कीर्तिशेषं गतवति च नृपे क्ष्मात्यये जायमाने।
भर्त्तारं यं धरित्री त्रिदिवविभुनिभं प्रीतियोगादुपेता
त्राता विश्वस्य पूर्वं समभवदिह स क्ष्मापतिश्चन्द्रदेवः॥
तस्मादभूद्रि(द्वि)षदिलापतिदन्तिसिंहः
क्षोणीपतिर्मदनपाल इति प्रसिद्धः।
येनाक्रियन्त वभु(बहु)शः समरप्रबन्धाः
संनर्तितप्रहतशत्रुकबन्धबन्धाः॥
तस्मादजायत नरेश्वरवृन्दवन्द्य-
पादारविन्दयुगलो ज्वलितप्रतापः।
क्षोणीपतीन्द्रतिलको रिपुरग(ङ्ग)भङ्गी
गोविन्दचन्द्र इति विश्रुतनामकीर्तिः॥
तिष्ठतो यस्य दोःस्तम्भे मत्तशौर्यैकदन्तिनः।
धनुर्गुणकिणश्रेणी मदराजीव लक्ष्यते॥

संवत्सहस्रैके द्विषष्टयुत्तरशताभ्यधिके कार्तिकपौर्णमास्यां भौमे दिने। अङ्के[ना]पि संवत् ११६२ [कार्तिक]सुदि [१]५ भौमे अद्येह श्रीमद्विष्णुपुरावासितश्रीविजयकटके सकलकल्मषक्षयकारिण्यां गङ्गायां स्नात्वा यथाविधानं मन्त्रदेवऋषिमनुष्यभूतपितॄंस्तर्पयित्वा सूर्यं भट्टारकं संपूज्य भगवन्तं महेश्वरं समभ्यर्च्य विश्वाधारं वासुदेवं समाराध्य मन्त्रपूतं भु(हु)तवहं हुत्वा पञ्चालदेशे जीआवतीपत्तलायां उसिथाग्रामे समस्तविषयसा(पा)र्श्ववर्तिसमस्तमहत्तमजनपदान्संबोधयति समाज्ञापयति—यथा ग्रामोऽयं मया स्वसीमातृणयूतिगोचरपर्यन्तः सजलस्थलः साम्रमधूकः सगर्तोषरपाषाणः सनदीवनलोहलवणाकरः सदशापराधदण्डः साकाशपातालः स्वसीमाचतुराघाटविशुद्धान्तः पूर्वदत्तदेवब्राह्मणवर्जितः नलिनीदलगतजलवत्तरलतरं प्राणिनां जीवितं विज्ञाय करिकलभकर्णाग्रविलसितचपलां लक्ष्मीं विलोक्य जलबुद्बुदाकारं यौवनं परिज्ञाय कदलीदण्डवत्संसारमसारतरं समाकलय्य साविथदेशनिर्गताय वाजसनेयशाखामृगाय[1] बन्धु-

लगोत्राय बन्धुलाघमर्षणविश्वामित्रत्रिप्रवराय दीक्षितनागानन्दपौत्राय दीक्षितपुरवासपुत्राय यजुर्वेदविद्यानलिनीविकासनप्रत्यक्षभास्कराय दीक्षितवील्हाकाय श्रद्धाविशुद्धमनसा महाराजपुत्रश्रीमद्गोविन्दचन्द्रदेवेन कुशपूतहस्तोदकेन कार्तिक्यां निमित्ते सम्यगाजू(हू)यासै ब्राह्मणाय मातापित्रोरात्मनश्च यशःपुण्यविवृद्धये चन्द्रार्कोदधिक्षितिपवनाम्बराणि यावच्छासनीकृत्य प्रदत्तः। मत्त्वा यद्दीयमानभागभागकूटकदशवधविंशति-छवथाकेरे(?)तुरुष्कदण्डप्रभृतिसर्वादायान् तत्सर्वमस्मै निवेदनीयम्।

ये यास्यन्ति महीभृतो मम कुले किंवा परस्मिन्पुर-
स्तेषामेष मयाञ्जलिर्विरचितो नादेयमस्मात्कियत्।
दूर्वामात्रमपि स्वधर्मनिरता दत्तं सदा पाल्यतां
वायुर्वास्यति तप्स्यति प्रतपनः श्रुत्वा मुनीनां वचः॥

अथात्र पौराणिकाः श्लोकाः—

भूमिं यः प्रतिगृह्णाति यश्च भूमिं प्रयच्छति।
उभौ तौ पुण्यकर्माणौ नियतं स्वर्गगामिनौ॥
योऽर्चितं प्रतिगृह्णाति ददात्यर्चितमेव वा।
तावुभौ गच्छतः स्वर्गं नरकं तु विपर्यये॥
बहुदि(भि)र्वसुधा भुक्ता राजभिः सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥

यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि।
निर्माल्यवत्तत्प्र(वान्तप्र)तिमानि तानि को नाम साधुः पुनराददीत॥

अस्मत्कुलं परमुदारमुदाहरद्भि-
रन्यै(न्यै)श्च दानमिदमचाणु(भ्यनु)मोदनीयम्।
लक्ष्म्यास्तडित्सलिलबुद्बुदचञ्चलाया
दानं फलं परयशःपरिपालनं च॥
षंख(शङ्खं) भद्रासनं छत्रं वराश्वा वरवारणाः।
भूमिदानस्य चिह्नानि मसं(फलं) [स्वर्गः] पुरंदर॥

स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
स विष्टायां कृमिर्भूत्वा पितृभिः सह मोदते ॥
प्रतीहारगौतमश्च जागूकश्च पुरोहितः ।
जननी राल्हदेवी च वील्हणश्च महत्तकः ॥
एषां संमतिं प्राप्य सम्यग्लिखितवानिदम् ।
नाम्ना विजयदासाख्यः शासनं राजसंमतम् ॥

(एपिग्राफिआ इण्डिका—२।३५९–३६१)

---

(१२८)

मोकलमहाराजकारितशिवमन्दिरप्रशस्तिः ।[1]

ॐ नमः शिवाय ।

सिद्धार्थामरसुन्दरीकरवलत्सिन्दूरधारारुण-
श्रीगण्डस्थलमण्डलीयुगलसद्दानाम्बुपूरोज्वलः ।
संध्याभ्रच्छुरिताग्रसानुनिपतन्नाकापगौधद्वयः
स्वर्णोर्वीभृदिव प्रयच्छतु शिवं देवो गजास्योऽव्ययम् ॥
वेदा वागिति शिष्टतामुपगतो यः कर्मणामीक्षिता
साक्षी तत्प्रतिभूः पुनर्भवति सन्सिद्धार्थसंदर्शनः ।
जात्यैवैषु विनश्वरेषु सकलं दाता विविक्तः फलं
देवः स्वस्तिकरः परः स सततं स्तादेकलिङ्गाभिधः ॥
भूमीभृत्स्वयमेधितस्थितिरियं गुर्वी नगा बन्धवो
विन्ध्योऽगस्त्यचरित्रतो न चकितः प्रास्थापयद्ब्राह्मणान् ।
कन्या मान्यतमा महोत्सवविधावित्येकमन्त्रोक्तितो
यामानीनयदर्चनाय गिरिजा विन्ध्यालया सावतात् ॥

---

१. अस्य प्रशस्तिभूतस्याधारभूता शिला मेवाडदेशान्तर्गतचित्रकूटनगरस्थशिवमन्दिरे उपलभ्यते. अस्याः प्रतिलेखः Dr. A. Fuhrer महाशयैः कृतः Dr. Burgess महाशयैः मह्यं दत्त इति Professor F. Kielhorn, Ph. D., C. I. E., महाशयाः.

कालिन्दीतटकुञ्जबद्धवसतिः सेयं प्रिया राधिका
स्मर्तव्यं ननु रुक्मिणी न भवती हुं चारुहासिन्यसि ।
युक्तं ना[सि] कलावती सुविदितं त्वं सत्यभामेऽन्यथा
नोक्तासीति विनिह्नुतोक्तमुदितश्लेषोऽच्युतः पातु वः ॥
स्फारन्यायोऽन्ववायो गुहिलनरपतेरस्ति जाग्रत्प्रशस्ति-
र्व्यस्तीभूतान्तरायो वसतिरिह युगे धर्म्यकर्मोदयस्य ।
शश्वद्यागानुरागे(ग)स्थिरविमलनिधौ भूरिभोगोनभागां
भूयो नूनां विधत्ते सपदि शतमखी यत्र संभूय शक्रः ॥
वाक्सेतोरचलन्मतिर्दिशि दिशि प्रख्यातमानोन्नति-
र्निर्यान्निस्खनवाहिनीपरिवृतो नानाधनैकाकरः ।
अत्यक्तक्षितिविग्रहो मुनिकथागीतादिगोत्रस्थिति-
र्विन्ध्यो बन्धुरबन्धुतां वितनुते यस्योपपन्नश्रियः ॥
वंशे तत्रारिसिंहः क्षितिपतिरजनि क्षत्रनक्षत्रलक्ष्मी-
वीक्षादक्षोरुयुत्क्ष्माबहुलजरजनिध्वंसभास्वद्गभस्तिः ।
विन्ध्यावन्ध्यप्रदेशस्फुरदमलखनिव्यक्तरत्नाकरत्व-
स्फारश्रीमेदपाटक्षितिब(व)लयवलद्वुग्धपाथोदचन्द्रः ॥
नरपतिररिसिंहः शस्त्रशास्त्रोपदेष्टा
वितरणरणकर्णो विश्वविख्यातवर्णः ।
स्फुरदमलगुणौघः पुण्यगण्योरुनामा
नयविनयविवेकोद्यानपुंस्कोकिलः सन् ॥
बिभ्यत्सिंहपदादमुष्य सकरी नूनं मघोनो यतो
बाजी सत्र(त्र)हविस्तताध्वरभुवं नोच्चैःश्रवा गच्छति ।
आहूतः कथमेरु वाहनमृते देवाग्रणीर्वृत्रहा
मेघं वाहनमातनोदयमतः सद्धोमधूमोद्भवम् ॥
कीर्तिः कौतुकिनी दिगन्तमगमत्कर्पूरपूरोज्व(ज्व)ला
खेलन्ती निजवासिताश्रमवशादालिङ्गिता दिग्गजैः ।

क्षीराम्भोनिधिगाहनं तु विधिना कृत्वादरादुत्थिता
ब्रह्मादीननुयोक्तुमुत्तमगुणस्यास्य प्रगल्भा दिवम् ॥
विशिष्टजनसंगतौ व्यतरदेकलक्ष्यं यत-
स्ततोऽधिकतरं यशोऽलभत भोजभूमीपतिः ।
अयं कथमदःसमः कविभिरुच्यते वाददा-
द्विशेषविधिनान्वहं विविधलक्षभोजानपि ॥
निर्व्रीडो न महेश्वरो न कठिनो नाचेतनश्चिन्तितं
दातानेकगवीश्वरः परिवृढो नो भारती दुर्भगा ।
सेनानीर्न विपक्षसंगतिरतो नोच्चैःश्रवा वा हयो
नारामः कतिचित्तरुः कथमदः पुर्याः स धुर्या दिवः ॥
शूरः सूनृतवागनूनविभ[वो] वंशावतंसः सुत-
स्तस्य न्यक्कृतरत्नसानुगरिमा हम्मीरवीरो जयी ।
विख्यातः सररूपजित्वरवपुर्लक्ष्मीनिवासाच्युतो
वाग्देवीचतुराननो रिपुकुलप्लोषोग्ररूपो महान् ॥
हम्मीरः किल वैभवोचितविधिर्दित्सुः सहस्रं गवा-
मित्याकर्ण्य सहस्रगू रविशचीनाथौ भयं जग्मतुः ।
शश्वत्तद्गृहसि स्थितान्मुररिपोः श्रुत्वा सहस्रं पुन-
र्धेनूनां समुपागतावतिमुदा तद्दानमेवेक्षितुम् ॥
कर्णादीनतिशय्य दिग्जयविधावादाय दिग्मण्डली-
दण्डं दूरमपास्य कालमसकृद्दाता स्वयं दक्षिणाम् ।
इत्याकर्ण्य जनश्रुतीः परिभवं स्वं शङ्कमानोऽन्तक-
द्रष्टुं न क्षमते प्रजा मनुनये यस्मिन्महीं शासति ॥
प्रासादमासादितशातकुम्भकुम्भं वसद्देवमचीकरद्यः ।
अचीखनत्सागरकल्पमल्पेतरत्सरश्चूतवनीभिरिद्धम् ॥
संग्रामग्रामभूमौ सदिदमसिलता संगता पञ्चशाखे
सच्छाये श्यामलाङ्गी क्षतजजलवलत्पुष्टिरिष्टप्रचारा ।

चित्रं सूते विकोशा कुसुममतिमहत्कीर्तनीयं दिगन्ते
धा[म्ना]म्नाता नितान्तं दलयति नियतं वारणाङ्गे पतन्ती ॥
हम्मीरवीरो रणरङ्गधीरो वाङ्माधुरीतर्जितकेकिकीरः ।
धराधवालंकरणैकहीरस्तत्तद्वनीभूषितसिन्धुतीरः ॥
एतत्पाणौ कृपाणी द्विषदसुपवनाहारतोषं दधाना
कालाकारोरगीव स्फुरति सचकितं वीक्षिता भीतिहेतुः ।
नाधः काये कथंचिद्दशति बहुमता नो बिभीते विपक्षा-
त्स्वर्गे वासं क्ष[ता]नां वितरति रमते न द्विजिह्वेन चित्रम् ॥
पायं [पायं सुपीनः] परभटरुधिरं तन्महीगर्भजाता
खड्गः कालः कुतोऽयं कथमियमपरा कीर्तिरत्युज्व(ज्ज्व)लास्य ।
एकेनाख्यायि नूनं रुददरिवनितानेत्रतोयेऽञ्जनाढ्ये
तासामुद्वर्तितेयं मृदुभुजब(व)लयस्वच्छचूर्णैरजस्रम् ॥
उद्यत्प्रौढप्रतापानलमुषितमहाबिम्बशेषो विवस्वा-
न्पश्चादुद्दामकीर्तिच्छुरिततरतनुः शीतरश्मित्वमेति ।
शङ्के रूपान्तरं स्वं कलयति स वपुर्भेदभीतो रणक्ष्मा
धीरे हम्मीरवीरे भ्रति परसुभटान्संगरे संमुखस्थान् ॥
कुर्वन्पद्मे जनुः स्वं विधिरिति विधिदृग्दृष्टसृष्ट्यग्रदिष्टो
नो पङ्के जन्मदोषं व्यजगणदतुलं तस्य रक्तेतरस्य ।
भूत्वा हम्मीरदेवक्षितिपतियशसः स्वच्छवर्णोपमेयो
गन्ता पुण्योपमानं दिशि दिशि सुचिरं सत्कवीनां सुखेषु ॥
गौरो गौरीशहासादपि रुचिररुचिश्चन्दनाच्चन्द्रतो वा
कान्त्या कर्णाटकान्तासितदशन[च]तुष्कानुमेया सुगेया ।
शेषस्याशेषवेषस्फुरदमृतरुचश्चारुसौन्दर्यधुर्या
कीर्तिर्यस्येन्दुमूर्तेः किल चरति दशाशान्तविश्रान्तयात्रा ॥
तस्मात्क्षेत्रमहीपतिः समभवत्ख्यातो गुणाम्भोनिधिः
शौर्यौदार्यमहत्व(त्त्व)सत्व(त्त्व)महितो धर्मो वपुष्मानिव ।

शक्रार्धासनभाजि येन जनके रत्नाकरालंकृति-
भूर्भुक्ता जितपूर्वराजगिरिमप्राप्तप्रभाशालिना ॥
हृदि विनिहितरामो योऽस्त्रविद्याभिरामो
मदनसदृशमूर्तिर्विश्वविख्यातकीर्तिः ।
समरहतविपक्षो लीलया दत्तलक्ष्मी-
र्नयनजितसरोजः प्रक्रियाक्रान्तभोजः ॥
संग्रामे दन्तिदन्तज्वलनकणमुचि प्रोल्लसद्वीरयोध-
स्फारोन्मुक्ताशुगालीनिबिडकवलिताशेषकाष्ठान्तराले ।
जित्वा दुर्गं समग्रं नरपतिमहितं साधुवादस्य सम्य-
क्स्तम्भं योधाद्धरित्र्यामरिकलपतगश्रेणिचण्डप्रदीपः ॥
आक्रान्ता वृषपुंगवेन विलसद्वासा चतुर्भिः पदैः
सम्यग्वीक्षणपालिता नवनवप्राप्तप्रकर्षोदया ।
प्रासोष्टामरनैचिकीव बहुशो रत्नान्यनर्घ्याणि गौः
शूरे कीर्तिपयो धराशतमखे यस्मिन्महीं शासति ॥
कीर्तिक्षीरोदपूरे बहुविधबिरुदप्रोल्लसद्वीचिमाले
कृष्णः शेतेऽस्य खड्गः सुखमुरुसमरे शेषमासाद्य शत्रोः ।
दृश्यन्ते राजहंसा दिशि दिशि न ततो मानसे लीयमानाः
सीदत्पक्षा विलक्षाः स्फुरति न कमलोन्मेषितापेक्षितैषाम् ॥
अस्यासिः कालरात्रिः स्फुरति किल भवन्मण्डले वैरि·····
·····[प्रो]द्भासिवेश्मप्रभवदहिभयं भूतराजोरुतापम् ।
पद्मोद्बोधो न चैषां भवति विघटते चक्रयो[गो] नियोगा-
द्भूरिर्जागर्ति भित्तिः पतति निजपथो नोज्झितः पङ्कपातः ॥
भ्रातः कल्पतरो किमात्थ भगवन्हेमाचल श्रूयतां
कर्तुं क्षेत्रमहीपतिः प्रयतते दानानि पुण्याशयः ।
वर्ते[ऽहं स्व?]करे गृहाङ्गणभुवि त्वं वर्तसे नित्यशः
क्रीडार्थं यदि [वा] ददाति हि तदा वक्तुं क ईष्टे जनः ॥

इत्थं दानकथा मिथो विजयते चिन्तामणिस्वर्गवी-
मुख्यानामपि दानशास्त्रविलसन्नाम्नाममुष्य प्रभोः ।
उन्मीलच्छरदम्बुजामलदलस्वच्छायताक्षिस्फुर-
त्कोणस्थायुकमित्रवैरिपरिषत्संपद्विपद्वर्त्मनः ॥
माद्यद्वेतण्डचण्डध्वनिभरविगलद्वीरवर्गोरुघैर्ये
स्फूर्जत्कोदण्डदण्डप्रपतदिषुचयच्छन्नसैन्येऽप्यनन्ये ।
जन्ये प्राणैकपण्ये गणयति न गणं विद्विषां पुण्यराशि-
र्धन्यः क्षेत्रक्षितीशः प्रतिभटनृपतिक्ष्माकराकृष्टिदृष्टिः ॥
मूर्च्छालं तु जडीभवच्छ्रुतिपथं संशुष्कितैकत्वचं
मीलन्तं च मुहुर्मुहुः शिथिलितं यान्तं न [वा] सुस्थितम् ।
दारिद्र्योपहतं विबोधयति यद्दुष्टाहिदष्टं यथा
जाप्यं कर्णपथाश्रितं सुविमलं यन्नाममन्त्राक्षरम् ॥
तत्सूनुः किल लक्षसिंहनृपतिः ख्यातो गुणग्रामणी-
रुद्यद्दानफलामलार्जुनयशोवल्लीमतल्लीतरुः ।
यत्तेजःशिखिनो [वि]पक्षवनितानेत्राम्बुजातद्युतेः
काष्ठान्ताक्रमणं [झ]टित्यनुदिनं नाभूद्विचारास्पदम् ॥
रामः किं जितदूषणः सुभरतो रामानुरागास्पदं
शत्रुघ्नः किमु लक्ष्मणोदयभरः सुग्रीव इद्धाङ्गदः ।
तारावल्लभ उत्तमेन वपुषालंकारमा[या]दतो
यो रामायणनायकैकतनुतां द्रष्टुं विधात्रा कृतः ॥
दानादुद्दामसामा शरणगतजनत्राणपाषाणसीमा
भीमासीमैकधामा शतमखपुरतो विद्विषा गीतनामा ।
अक्षामारामदामा मखमुखविलसद्धूमधूमोच्चसामा
सल्लक्ष्माशेषरोमा धरणिसुरतरुर्लक्षसिंहः स धीमान् ॥
वैरिक्षोणीन्द्रमत्तद्विरदमदनुदः सिंहतः शुद्धसारा-
दारादुद्गीतकीर्तेरमरपुरभिष[क्रान्ति]निर्णीतमूर्तेः ।

दाने माने कृपाणे यशसि महसि [वा] साधुवाण्यां कृपाण्यां
वीराल्लक्षक्षितीशाज्जगति न हि परः ख्यातिभक्तिः सु[भु]क्तिः ॥
नीतिप्रीतिभुजार्जितानि [लक्ष]शो रत्नानि यत्नादयं
दायं दायममायया व्यतनुत ध्वस्तान्तरायां गयाम् ।
तीर्थानां करमाकलय्य विधिनान्यत्रापि युङ्क्ते धनं
प्रौढग्रावनिबद्धतीर्थसरसीजाम्रद्यशोऽम्भोरुहः ॥
संग्रामेषु गतागतानि विद[ध]ल्लक्षं परैर्लक्षितो
दत्वा(त्त्वा) लक्षमपि स्व[यं न] तनुते संतोषमब्जेक्षणः ।
कुर्वाणः किल कानकीमपि तुलां तत्खण्डबिम्बच्छला-
[ल्ल]क्षं स्वां तनुमातनोदिति नृपो लक्षप्रथोऽजायत ॥
दाने हेम्नस्तुलायां मखभुवि बहुधा शुद्धिमापादि[ता]नां
भास्वज्जाम्बूनदानां कुतुकिजनभरैस्तर्किता राशयोऽस्य ।
संग्रामे लुण्टितानां प्रतिनृपमहसां राशयस्ते किमेते
विन्ध्यं बन्धुं समेतुं किमु समुपगताः साधु हेमाद्रिपादाः ॥
रुद्धाशेषपदां शकाधिपकरव्यग्रीभवज्जीवनां
धीरोऽमूमुचदर्जुनीमिव गयां मायाविमुक्ताशयः ।
धर्मश्चास्य समस्तलोकमहितः [का]ष्ठां परामागतो
निः[सत्त्वी ?]कृतधर्मराजवसतेः पद्मालयासद्मनः ॥
मत्तुल्या [न]नु नाभवत्किल तुला पूर्वेति गर्वं तुला-
मुष्य क्षोणिपतेर्ध्रुवं कृतवतो गर्वासहिष्णोः पुरः ।
तस्यास्तस्य मुदानुदां विदधता धीरेण दत्तापरा-
सौ मानादधिकाधिकीकृतविधिः सद्यो वियद्धाटका ॥
संख्यातुं कथमीशते कविजना दानानि नानाविधा-
न्यस्याकृष्टसमस्तराजवसुधावित्तस्य चित्तोन्नतेः ।
लब्धा नोद्विजते वनीपकगणान्दत्वा(त्त्वा) न यत्कीर्तये-
त्पात्रं प्राप्य मुदान्वितस्तृणतुलां स्वर्णं स्वमारोपयेत् ॥

तस्य क्ष्मावलयं नयेन नयतः संतोषमायु[ष्म]तः
संभूतः स्मरसुन्दरो गुरुनतः पुत्रः सुधीर्मोकलः ।
शक्त्या भूभृति दारुणं वितनु[ते] यत्तत्कुमारः पुरः
सर्वज्ञोऽस्ति यतस्ततोऽचलभुवो नाथस्तु पित्रा कृतः ॥
प्रासादा बहुशः समुन्नतियुजः क्षोणीभुजा कारिताः
शुभ्यन्मूर्धसु राजमानकनकप्रस्फारकुम्भश्रियः ।
नागेन्द्रा नु शिरःसु हाटकघटाना[धा]य लोलत्सुधा-
न्यातुं नाकमिवोत्थिता मखभुजां पीयूषपानोत्सुकाः ॥
अङ्गाः संप्राप्तभङ्गाः स्मृतघनविटपाः कामरूपा विरूपा
वङ्गा गङ्गैकसङ्गा गतविरुदमदा जातसादा निषादाः ।
चीनाः संग्रामदीनाः स्खलदसिधनुषो भीतिशुष्कास्तुरुष्का
भूमीपृष्ठे गरिष्ठे स्फुरति महिमनि क्ष्मापतेर्मोकलस्य ॥
मूर्धा सिन्दूररेखाशतमखधनुषा राजमाना गभीरं
कुर्वन्तः शब्दमुच्चै रदरुचिचपलाः स्निग्धतन्वा कचाभाः ।
संग्रामग्रामयाता रिपुकरिजलदाः प्राप्तकालोपयोगा
यस्येषुव्रातभिन्नाः खलु रुधिरजलं भूरि वर्षन्ति सद्यः ॥
अस्य प्रौढप्रयाणक्षणरणर[ण]कह्रेषमाणोरुमान-
स्फूर्जद्वर्वार्व[र्व]क्रमणभरभवद्धूलिधारान्धकारम् ।
ना[शं ने]ता विवस्वानिति तु विरमतु ध्वस्तनेत्रप्रकाशः
स्वानश्वानस्ववर्णान्यदि परिचिनुते तत्स भाग्यं महीयः ॥
वासो नाशासु भास्वत्कररुचिररुचाभासितास्वस्य वैरा-
त्पारावारान्तरायादपि नहि गमनं दूरमस्मादकस्मात् ।
सेवाहेवाकमेवाचरत बहुमतं दत्त वित्तं नितान्तं
[मं]त्रोऽमात्यैरकारि प्रतिविमतसदो भूपतेर्मोकलस्य ॥
प्रुष्टप्रौढारिवर्गप्रथितपुरब(व)लद्धूमधूमप्रचारै-
र्धूम्रं ब्र[ब्र]ह्माण्डभाण्डोदरमतिविपुलं वीक्ष्य दक्षेषु मुख्यः ।

कीर्त्यालेपं सुधोत्थं कलयति बलवान्दिग्वधूकिंकराभि-
स्तारावद्विन्दुवृन्दच्छुरणबहुरुचा योऽम्बरेणावृताभिः ॥
नेता पातोत्तराणां यवननरपतिं लुण्टिताशेषसेनं
पेरोजं कीर्तिवल्लीकुसुममुरुमतिर्योऽकरोत्संगरस्थः ।
पल्लीशाक्रान्तिवार्ता कलयति कलया कीर्तिता यस्य हेलां
पञ्चास्यस्येव माद्यद्गजदलनरुचेर्लीलया रङ्कुभङ्गः ॥
आरूढः सविता तुलां कलयति द्राङ्नीचतां कन्यया
दूरं मुक्तपरिग्रहो बहुरुचा चित्रोल्लसद्धस्तया ।
धीरोऽयं पदमुत्तमं तु विधिना प्राप्तस्तुलां गाहते
कन्याभिर्व्रियतेतमां क्षितिभुजां श्रीमोकलक्ष्मापतिः ॥
मानत्राणमना मनागपि मनोरन्यूननीतिव्रतो
नो जानाति निजप्रतापमतुलं सिंहो यथा विक्रमम् ।
मन्ये भास्वरहेमराशिमिषतो धाता तुलायामधा-
देतस्मादपि सोऽगमच्च गुरुतामद्यापि जा[ना]ति किम् ॥
दृष्ट्वा हाटककोटिकूटमतुलं दानाय मानाधिकं
सद्यः शोधित[सूत्र]तैकमतयः संशेरते शाब्दिकाः ।
शक्रप्रार्थितहेमदे सुरतरौ किं किं नु चिन्तामणौ
हेमाद्रौ शकलीकृते किमु तुलाशब्दस्तु संकेतितः ॥
दीव्यत्तद्वीरतुङ्गत्तरतुरगवरव्रातजातोरुवात-
क्षुभ्यत्तत्क्ष्मोत्थरेणुक्षतनयनरुजाव्यग्रसूताः खरांशोः ।
मन्दायन्ते गतेश्चास्तत इव वनिता वैरिणां तद्दिनानां
यामाञ्जानन्ति दीर्घानवितथविरुदे मोकलेन्द्रे रणस्थे ॥
को वा नो वेद विद्वांश्चरमयुगकलावेकपादेव धर्मः
खञ्जन्नष्टावलम्बः किल चरतु कथं पीनपङ्के जनेऽस्मिन् ।
सोऽयं सद्वंशयष्टिं बहिरबहिरथो शुद्धसारोपपन्नं
प्राप्य श्रीमोकलेन्द्रं प्रविशति विपुलां मण्डलीं पण्डितानाम् ।

नूनं द्यूतविधावधान्मखभुजामीशः सुमेरुं पणं
गण्यस्तत्र मनस्विनां व्यजयत श्रीमोकलक्ष्मापतिः।
तादृक्षाः क[थ]मन्यथावनितले हेम्नाममी राशयो
नैषां दानविधावमुष्य च मनःपीडाकलापि क्वचित् ॥
वह्नावह्नाय सर्पिःपतननवरुचौ भूमिधूमायमाने
दूनां····म[क्षि १]पन्तौ कथमुपकुरुते यागभागो मघोनः।
पुण्येनास्यैव जाने दिनमणिरयते सत्कराणां सहस्रं
बिभ्रत्सद्योऽस्ततन्द्रः स्थगयति विधिना योऽयमक्ष्णां सहस्रम् ॥
आरुह्यामलमण्डलोऽकृत तुलां यः पुष्करद्योतनं
पुण्यश्रीः स कथं तथा प्रथमतो गण्यो न तेजस्विनाम्।
निष्पङ्का करलालिता वसुमती सद्राजहंसा यतो
व(ब)न्धूनामुदयस्ततस्तदुदये स्यात्संपदामौचिती ॥
पारावारस्य वेलातटनिकटमनु प्राप्तशैलाधिवासा
शत्रुश्रेणी समग्रा निवसति सततं भीतभीता नितान्तम्।
जेतुं यात्रादसीया यदि भवति तदा वाजिराजीखुराग्र-
त्रुट्यत्क्ष्माधूलिधारा स्खलयति जलधिं पारयानाय तस्य ॥
आसाद्यातिथिमाश्रयं त्रिजगतां श्रीद्वारकानायकं
प्रासादं रचितोपचारमकरोद्भूमीपतिर्मोकलः।
देवेनाम्बुजबान्धवेन चकितं यो वीक्षितः शङ्कया
विन्ध्याद्रेर्गिरिसत्तमस्य नियतं मुक्तस्य वाग्बन्धनात् ॥
यस्य प्रत्युप्तकर्मद्रवदखिलमहाधातुसंभारधारा-
पातक्ष्मातापशुष्यद्बलबिलविलसल्लोललालः फणीन्द्रः।
व्याचष्टे स्पष्टमिष्टं ध्रुवमयमधुना भाष्यमाभाष्य शिष्यं
स श्रीभर्तुः पुरस्ताज्जयति स्वमपतिर्मोकलेन्द्रस्य कीर्तेः ॥
सोढुं नेशः पयोधिः क्षणमपि विरहं द्वारकानाथ(य)कस्य
* प्रेम्णा पादोपमूलं स्वयमुपगतवान्यत्तडागच्छलेन।

नोदन्या कुम्भयोनेरतिपततितरामन्तरेणैनमेष्य-
ञ्शापान्तं मे विदध्यादयमिति विनयाद्विन्ध्य एवानयद्यम् ॥
विन्ध्यस्कन्धैकबन्धुर्निजवितततिभरादन्धुतानीतसिन्धु-
र्नीरक्रीडत्पुरंध्रिप्रसभकुचतटाघातसीदत्तरङ्गः ।
संतुष्यत्तोयजन्तुर्विविधनगनदीवेगसंरोधतन्तुः
सन्सेतुर्नेतुरस्य स्फुरति वसुमतीसिद्धिहेतुः सुकेतुः ॥
अमुष्य धरणीभृतो विषयमध्यवर्ती महा-
दरीवृतवपुष्टया [वि]वृतदूरगम्भीरतः ।
म[हो]दर इवापरः परममानगम्यान्तरः
पवित्रतरकीर्तनो जयति चित्रकूटाचलः ॥
जायन्तां नाम कामं कुलधरणिभृतः सप्तशृङ्गौघतुङ्गा
वैचित्र्या चित्रकूटं तुलयितुमनलं तीर्थभूतप्रदेशम् ।
मा भूवन्निर्झरिण्यो मदुदितजनुषो नीचगामानशौण्डः
शृङ्गे यः क्षीरवारांनिधिमधिततरामुद्यदम्भोजवासम् ॥
उद्दामग्रावनिर्यज्झरभरकणिकाजातसेकातरेक-
स्निह्यच्छालप्रवालप्रभवदुरुतराभोगसूनप्रसूतात् ।
मध्वासारादपारादुप[हृ]तजनुषो दाववह्नेर्निदाघे
विष्वद्रीचो वनानि प्रसभपरिभवं नेह शैले विदन्ति ॥
एतस्मिन्सरिदस्ति निर्मलजला यस्यां निवापाञ्जला-
वुन्मीलत्तिलजातपातकवलव्यग्राः शफर्यश्चलाः ।
क्रीडासंभ्रमविस्मृतान्सुबहुशो मज्जद्वधूनामहो
नेत्राणीव विलोपिकज्जलकणांश्चेतुं स्फुरन्ति स्फुटम् ॥
लङ्का किं नाम दुर्गं जलनिधिरचिता यत्र सा काल[काका ?]
[प्रा]वृट्का[ले] विवर्गैरपि गलितमदैर्या त्रियेतेति मानी ।
यो धत्ते क्षीरवारांनिधिमुपरि परै राजहंसैरगम्य-
स्तद्दुर्गं चित्रकूटो जयति वसुमतीमण्डनं भूतिभूमिः ॥

सौभाग्यैकमहौषधिर्भगवती यस्मिन्भवानी स्वयं
जागर्ति प्रियसंनिधानवसतिः साध्वीजनानां गुरुः।
देवः सोऽपि समस्तनाकरमणीसंतानदामव्रज-
प्रश्च्योतन्मकरन्दबिन्दुसुरभिप्रस्फारनृत्याङ्गणः॥
सेवाहेवाकिदेवस्तुतहरचरितप्रोल्लसद्भावसंप-
त्सद्यःस्विद्यद्भवानीकृतसुखवसनस्फारसौरभ्यहारि।
यद्वारि प्रातिभाव्यं वहति मृगदृशां मज्जतीनामजस्रं
पातिव्रत्ये समन्तात्समधिकसुभगंभावुकत्वेऽपि शश्वत्॥
गिरिः कैलासो यद्दशमुखभुजोच्छासनदिना-
द्गलन्मूलस्थामा प्रभवति न नाट्यं विषहितुम्।
प्रदेशप्राग्भारप्र[कृ]तिरमणीये तदधुना
समाधीशः श्रीमानिह वसति गौरीसहचरः॥
एकैकप्रावतावत्कृतिमुषितमहासर्वकर्मीणमानं
कृत्वा प्रासादमाशामुखमुकुरमतिव्योमसीमानमस्य।
यस्याशेषोपचारक्षमधनमुदितारी.....
द्धीरः श्रीमोकलेन्द्रो धनपुरमुचितं ग्राममायामिसीमम्॥
अब्दे बाणाष्टवेदक्षितिपरिकलिते विक्रमाम्भोजबन्धोः
पुण्ये मासे तपस्ये सवितरि मकरं याति जीवे घटस्थ।
पक्षे शुक्लेतरस्मिन्सुरगुरुदिवसे चार्यमर्क्षे तृतीया-
तिथ्यां देवप्रतिष्ठामयमकृततरां मोकलो भूमिपालः॥
उन्मीलद्यागयात्रोद्यतसुरतरुणीगीतसंग्रामधामा
सुत्रामा यावदीष्टे त्रिदशपरपरीपालनस्पष्टनीतिः।
पर्यायोपात्तभूनां स्फुरति दशशती शेषमूर्ध्नां च याव-
त्तावत्प्रस्फारलक्ष्मीरवतु वसुमतीं मोकलेन्द्रस्य बाहुः॥
श्रीमद्दशपुरज्ञातिर्भट्टविष्णोस्तनूद्भवः।
नाम्नैकनाथनामायमलिखत्कृतिमुज्व(ज्ज्व)लाम्॥

अनेकप्रासादैः परिवृतमतिप्रांशुकलशं
गिरीशप्रासादं व्यरचयदनूनैरनुचरैः।
मनाख्यो विख्यातः सकलगुणवान्वीजलसुतः
सुतः शिल्पी जातो गुणगणयुतो वीसल इति ॥
अतिप्रशस्तैरलिखत्प्रशस्तिं वर्णैरवर्णेन बहिष्कृतैर्यः।
श्रीमत्समाधीशमहेश्वरस्य प्रसादतोऽसौ चिरजीविनोऽस्तु ॥
वी[जलस्य] सुतः शिल्पी मनाख्यः सूत्रधारकः।
तस्यात्मजेन वीसेन प्रशस्तिरियमुत्कृता ॥
रुचिराक्षरमुत्कीर्णा प्रशस्तिरियमुज्व(ज्ज्व)ला।
लिलेख वीसलः शिल्पी समाधीशप्रसादतः ॥
संवत् १४८९ वर्षे माघसुदि (३) गुरुदिने.....

(एपिग्राफिआ इण्डिका—२।४१०–२१)

---

(१२९)

[1]श्रीकुन्तीमाधवभगवन्मन्दिरस्तम्भोत्कीर्णा प्रशस्तिः।

श्रीकान्तस्य निजोदरान्तरचरद्ब्रह्माण्डखण्डावन-
व्यापाराभिरतस्य वेद[शिर]सामावासभूमेर्हरेः।
नाभ्यम्भोरुहगह्वरापवरकादाविर्बभूवात्मभू-
र्भूतादिप्रकटप्रपञ्चरचनादक्षः पुराणोऽव्ययः ॥
तत्पादाम्बुरुहान्महेन्द्रविनुताज्जज्ञे चतुर्थान्वय-
स्त्रैलोक्यैकगुरोर्हरेः पदतलाद्गङ्गाप्रवाहो यथा।
तस्मिन्विस्मितसूरिसंहतिनुतोऽभूदिन्द्रसेनो नृपो
राजा धर्मसुतेन संगरविधि[:] प्रीतेन पुत्रीकृतः ॥

---

१. प्रशस्तिरियं गोदावरीतीरे पिठापुरनाम्नि ग्रामे कुन्तीमाधवनामकविष्णुमन्दिर मस्ति तत्र स्तम्भे उत्कीर्णेयमस्ति. सा च पृथ्वीश्वरदेवमहीपाललेखिता वर्तते इति. इय च E. Hultzsch, Ph. D. महाशयैः प्रकाशिता.

प्रीतिः श्वेतातपत्रं कनकविरचितं दण्डमाखण्डलाभो
व्योम्नि क्षौमं वितानं सकलनृपजनप्रार्थ्यसिंहासनार्धम् ।
नानावादित्रशङ्खध्वनिभिरभिनुतां मङ्गलालत्तिकां च
प्रादाद्धर्मात्मजोऽस्मात्तुहिनचयसिते चामरे चारुरूपे ॥
अशेषसुखसंभोगभागधेयैकभा[ज]नम् ।
मध्यदेशेऽभवत्तस्य स्थानं कीर्तिपुरं महत् ॥
सोऽयं धर्मनृपालदत्तनिखिलक्ष्मापालचिह्नश्रियं
राजत्साम्राज्ययशोवितानरुचिभिर्भूमण्डलं मण्डयन् ।
कुर्वन्सर्वसुधीधियः प्रमुदितास्तारागणैर्वावृतो
राजाराजत चातुरङ्गपृतनासंवेष्टितोऽसिन्पुरे ॥
यातेषु केषुचिदशेषधराधिपेषु तद्वंशजेषु विजितारिपराक्रमेषु ।
जज्ञे नयज्ञजनसंसदि कीर्तनीयः शास्ता समस्तजगतामथ कीर्तिवर्मा ॥
तद्वंशो मल्लवर्माभूत्तत्सुतो रणदुर्जयः ।
वैरिणो रणरङ्गस्थमीक्षितुं यं न सेहिरे ॥
ततो निखिलभूपालमौलिलालितशासनः ।
कीर्तिवर्माभवत्तस्य पुत्रोऽभूद्रणदुर्जयः ॥
तत्पुत्रः कीर्तिवर्मा
अनेकहस्त्यश्वपदातिवर्गविनिर्जिताराकुलः कलावान् ।
शशास पृथ्वीं प्रथितप्रतापस्तदात्मजो मल्लनृपोऽतिवीरः ॥
अथ त्रिनेत्रेण स पल्लवेन विधाय मैत्रीं विधिवद्विधिज्ञः ।
जिगीषया दक्षिणदेशमुच्चकैः प्रतस्थिवानास्थितसिंहविक्रमः ॥
सोऽयं गङ्गकलिङ्गवङ्गमगधानन्ध्रान्पुलिन्दान्नृपा-
न्वीरः कुन्तलकेरलक्षितिपतीन्गौडान्सपाण्ड्याधिपान् ।
जित्वा भोजमराटलाटकटकान्दैत्यानिवाखण्डलो
राजाभ्राजत षट्सहस्रजगतीमासाद्य सत्यव्रतः ॥
विविधविभवराजद्राजसंघाभिरामं
निधिनिचयसमेतं सिद्धविद्याधराढ्यम् ।

पुरमिव धनदस्य श्रीनिवासैकभूमि-
र्धनदपुरसमाख्यं तस्य राज्ञो बभूव ॥
तत्रायं धनदपुरे मुरारितुल्यः कल्याणैः स्वकुलपरम्परानुयातैः ।
कौन्तेयात्समधिगतैर्महीपचिह्नैः संयुक्तोऽशिषदवनीं स मल्लभूपः ।
तत एऋयवर्मा ततः कुडियवर्मा
तस्मान्मल्लमहीपतिः प्रतिबल[ध्वा]न्तौघधर्मद्युति-
र्जातोऽभून्निजखड्गखण्डितमहाचण्डाशनिः शाश्वतः ।
यो लोके गुणयोगतः पिडुवरादित्याभिधानं ययौ
दुष्प्रापं त्रिदशैरशेषजगतामीशैः समस्तैरपि ॥
तस्मादभूत्कुडियवर्मनृपः प्रमाथी
वैरिक्षितीशमदमानमनोरथानाम् ।
यद्युद्धभूमिषु मनीषितपूरुषाप्त्यै
गीर्वाणवारवनिता मुदिताश्चरन्ति ॥
तत्राखिलमहीचा[रु]पद्माकरसमृद्धिदः ।
विमलादित्यदेवोऽभूच्चालुक्यान्वयभूषणम् ॥
तस्याखिलक्षितिपमौलिकिरीटकोटि-
रत्नप्रभानिकरकान्तपदद्वयस्य ।
संग्रामभूमिषु चकार चिरं जिगीषोः
साहाय्यकं कुडियवर्मनृपोऽति[वी]रः ॥
ततः साहाय्यसंतुष्टः कुब्जवर्मम्हीभृते ।
विमलादित्यभूपालो गुद्रवारद्वयं ददौ ॥
राजराजस्तु तत्पुत्रो राजराज इव स्वयम् ।
निखिलैश्वर्यदृप्तात्मा राजशेखरसंश्रयः ॥
सोऽयं सूर्यकुलामृतार्णवभवामम्मङ्गयम्बां सतीं
राजेन्द्रप्रियपुत्रिकां नृपवर[:] श्रीराजराजस्तदा ।
नानाभूतसमस्तलोकविभवप्राप्तिप्रधानास्पदं
त्रैलोक्यैकगुरुर्यथा सरसिजां तत्रोपमेये हरिः ॥

अजनि निजभुजोद्यद्विक्रमाक्रान्तविश्व-
क्षितिभरणसमर्थः श्रीकुलोत्तुङ्गचोडः।
दिनकरमिव ताभ्यां यं कराकृष्यमाणा
प्रथित[ब]हलभासं राजलक्ष्मीः सिषेवे॥
तस्मादाविरभूद्धीरो वीरचोडः प्रतापवान्।
कुमारः कुपितारातिराजन्यमदभञ्जनः॥
श्रीकुलोत्तुङ्गचोडोऽपि पालयन्सकलामिलाम्।
वीरचोडकुमाराय प्रददौ वेङ्गिमण्डलम्॥
कुब्जवर्ममहीपालः परिपाल्य वसुंधराम्।
स्वराज्यभारमखिलं स्वपुत्रे स्म नियुक्तवान्॥
एरयोऽभून्नृपस्तस्माद्भृत्रशत्रुपराक्रमः।
ततोऽभवन्नन्निराजः संहृतारातिसंहतिः॥
तस्य प्रपञ्चितसमञ्चितपुण्यकीर्तेः पञ्चाभवन्निजभुजार्जितराज्यभाजः।
पुत्राः पवित्रचरिता विदुराख्यगण्डगोङ्कक्षमाधिपतिमल्लयपण्डसंज्ञाः॥
तेषां गोङ्कमहीपालः पालयन्नन्ध्रमण्डलम्।
श्रीकुलोत्तुङ्गचोडाज्ञां दधानोऽप्यधिकं बभौ॥
पुत्रस्तस्य समस्तराजनिकरप्रोद्यत्किरीटद्युति-
श्रेणिः शोणपदस्य गोङ्कनृपतेः श्रीचोडभूपोऽजनि।
यद्बाहायुगपालिता वसुमती स्वास्थ्यं परं व्यानशे
रामे राजनि राजलोकविनुते यावत्सुखं मेदिनी॥
तस्य गोङ्कक्षितीशस्य भ्रातुर्गण्डस्य धीमतः।
बभूव विदुरो नाम तनयो विनयान्वितः॥
अथ मथितवैरियूथे प्रथितगुणे वीरचोडनरपाले।
शासति राज्यं वेङ्गीमण्डलमाखण्डलोपमे रेजे॥
तस्याखिलारिनरपालसमूहराज-
लक्ष्मीकचग्रहणलम्पटदक्षहस्तः।

श्रीवीरचोडनृपतेर्विदुरक्षितीशः
साचिव्यमाचरदयं चतुरप्रतापः ॥
विदुरो वीरचोडस्य शासनानुचरश्चिरम् ।
पाण्ड्यदेवं जिगायाजौ सामन्तगणसंयुतम् ॥
तस्मै श्रीवीरचोडक्षितिपतिरखिलक्ष्माभृतां विस्मिताना-
मग्रे सिंहासनार्धं सकलनृपजनप्रार्थितं संदिदेश ।
देशं चाशेषसस्यप्रचुरफलयुतं सिन्धुयुग्मान्तराख्यं
प्रादात्प्रीतस्य भूयो विदुरनृपतये पातितारातिराजे ॥
अथ पृथुतरकीर्तिः श्रीकुलोत्तुङ्गचोडः
परनृपकुलमाथं गोङ्कभूपालपुत्रम् ।
सुतमिव परिगृह्यागर्हणीयस्वभावं
स्वतनयजनचिह्नैश्चोडभूपं युयोज ॥
ततश्चोडमहीपाय सूनवे स नृपोत्तमः ।
प्रीतः षोडशसाहस्रं प्रददौ वेङ्गिमण्डलम् ॥
सोऽयं चोडक्षितीशः प्रतिनृपतिकुलोन्मूलनाभीलभीमः
श्रीमद्वेङ्गीधरित्रीमभिमतफलदां पालयञ्च्छैलधीरः ।
रेजे राजीवराजन्निजनयनयुगो योगगम्ये पुराणे
पुष्णन्विष्णावभीक्ष्णं निखिलनृपजनाभ्यर्चितो भक्तियुक्तिम् ॥
तस्य त्रिवर्गसहचर्यतिमात्रपूर्णे
तारापतिप्रतिमवक्त्ररुचिः प्रियाभूत् ।
लक्ष्मीरिवाक्षयगुणा पतिदेवतानां
गुण्डाम्बिका धुरि सदा परिकीर्तनीया ॥
ताभ्यां शचीवासवसन्निनाभ्यामशेषलोकस्थितिहेतुभूतः ।
श्रीगोङ्कभूपोऽजनि राजलोककिरीटकोटीविलसन्निदेशः ॥
यद्युद्धेऽभिमुखा हताः किल पुरा देवत्वमासा द्विषः
श्रुत्वा वारिधरध्वनी[न्] घनपथे लोकान्तरस्था अपि ।

तद्युद्धोद्यमभूरिभैरवबृहद्भेरीरवाशङ्कया
कार्येष्वीप्सितसिद्धिमस्य नितरामाशीर्भिराशासत ॥
येनाखिलक्षितितलत्रिदशालयानां
कूटेषु हाटकमया घटिता विरेजुः ।
कुम्भाः स्वकीयजयघोषणसंप्रयुक्त-
स्तम्भा इवाभ्रचर[सं]स्तुतकीर्तिनैव ॥
येन श्रीमद्धीमनाथस्य चक्रे शाक्रं धाम प्रस्थितायाः स्वकीर्तेः ।
हेम्नो भूम्ना पादविन्यासहेतोः प्रासादाग्र्यं व्योमनि श्रेणिकेव ॥
यस्य श्रीकालहस्त्यद्रिमहेन्द्राचलमध्यगाः ।
भूपाः पुण्यप्रवीणस्य किङ्करा गोङ्कभूपतेः ॥
तस्य त्रिलोकगणनीयगुणाभिरामा
रामाजनेषु रमणीयविशेषमूर्तिः ।
सर्वाम्बिका तनुमती वसुधैव साक्षा-
दक्षीणपुण्यनिचया खलु धर्मपत्नी ॥
जातस्ताभ्यां परपुरजयी शूलपाणेरिवांशो
विद्वत्संघस्तुतशुभगुणो जन्मभूमिः कलानाम् ।
यन्नामैवाखिलरिपुकुलोत्सादकृन्मन्त्र उक्तो
दातार्थिभ्योऽर्थितगुरुतरं वीरराजेन्द्रचोडः ॥
येनाम्भोराशिभीमभ्रमितजलमिलद्ग्राहपाठीनसंघ-
प्रेङ्खत्कल्लोलमालाकलुषमनिमिषैः खातमादौ सरस्तत् ।
निःशेषं शोषयित्वावधि जलधिजलं कुम्भयोनिर्यथाद्यो(?)
भीमो भीतिं वितन्वन्द्रुतमितजगतां रावणो राघवेण ॥
यस्याविखण्डितविजृम्भितपुण्डरीक-
खण्डप्रभापटलपाण्डुतरेण नित्यम् ।
संछादिता वसुमती यशसा बभास
छत्रेण मौक्तिकमयेन विभूषितेव ॥

येनाराधनसाधनानि दधिरे भीमेश्वरस्यालये
सौवर्णान्यतिदीप्ररत्ननिकरैर्हेमप्रभा चार्पिता ।
यस्त्वक्षीणसुवर्णभारघटितं सद्रुक्मपीठस्थितं
कृत्वेन्द्रादिगणान्गुणैरतिययौ श्रीभीमनाथं मुदा ॥
कनत्कनकसंदोहकृतं मकरतोरणम् ।
योऽदाद्बालेन्दुचूडाय दाक्षारामनिवासिने ॥
विद्युल्लतेव जगतीतलसंचरिष्णु-
रानन्ददा शशिकलेव सतां नितान्तम् ।
अक्काम्बिकेति तरुणीजनरत्नभूता
जाया स तस्य जगतीपतिसत्तमस्य ॥
जातस्ताभ्यां शिवाभ्यामिव सकलजगद्रक्षणैकान्तदक्षेः
साक्षाद्देवः कुमारः सकलनृपकलाकोविदो गोङ्कभूपः ।
यद्वैरिक्षोणिपालाः क्षणमपि निखिले क्ष्मातले नासवन्तः
पादन्यासावकाशं वियति विदधिरे धाम तद्योग्यरूपाः ॥
यमर्थिसार्थाभिमतार्थदं क्षितौ क्षीणारिभूपालमवेक्ष्य नूनम् ।
स्वस्थोऽभवत्कल्पकभूरुहश्चिरं राजेन्द्रचोडप्रियपुत्रमुच्चैः ॥
संजीवनीव सकलस्य जनस्य नित्यं
रक्षाविधानचतुराभवदस्य पत्नी ।
लोकेषु यच्चरितमेव वदन्ति सन्तः
शास्त्रं नियामकमशेषसतीजनस्य ॥
या पर्वतापरमहीनृपवंशदुग्ध-
रत्नाकरादुदभवज्जगतां भवाय ।
पद्मालयेव हरिपादसरोजसक्ता
जायाम्बिकानिखिलसंपदवाप्तिहेतुः ॥
आस्थानमण्डपमखण्डितभोगभोग्यं
स्तम्भैः स्फुरत्परिकरैर्हरिनीलकान्तैः ।

श्रीपीठनामनि पुरे वसतोऽकरोद्या
कुन्तीमनोरथपथाप्तिकरस्य विष्णोः ॥
प्राकारगोपुरमनोहरमेतदीयं
निर्माय देवनिलयं कमलालयं या ।
सुस्थाप्य तत्सहितमच्युतमर्हणाभि-
राराधयन्त्यभिमतानि फलान्यवाप्नोत् ॥
श्रीसिंहगिर्यधिपतेः परमस्य पुंसो
भक्तार्तिकर्तनविधानगृहीतमूर्तेः ।
हेमाङ्गनाम निखिलश्रुतिसारवेद्यं
प्रत्यक्षमक्रियत चारु यया जनस्य ॥
भास्वत्स्फाटिकशैलशृङ्गरुचिषु प्रोद्यत्प्रभामण्डला
डिण्डीरद्युतिदेवधामशिखरेष्वास्थापिता भूरिशः ।
सौवर्णः कलधौतभूध्रशिखरासीनस्य भानोर्ध्रुवं
बभ्रुर्विभ्रममभ्रचारिविनुताः कुम्भा गुणाढ्या यया ॥
ताभ्यां श्रीपृथिवीश्वरः स्वयमिवाशेषस्थितेः कारणं
देवः श्रीपृथिवीश्वरोऽजनि जनप्रस्तूयमानोदयः ।
यस्मिन्राजनि रक्षति क्षितितलं क्षीणारिवर्गे जनो
व्युत्पत्तिं रिपुचोरवादिषु न च प्राप्नोति शब्देष्वपि ॥
यस्यातिनिर्मलतरेण परीतमेत-
द्ब्रह्माण्डमाशु यशसा नितरां विभाति ।
धूमाङ्कधौतकलधौतकरण्डभाण्ड-
मध्यप्रविष्टमिव विष्टपवल्लभस्य ॥
यं गन्धसिन्धुरसमं सततप्रवृत्त-
दानार्द्रदक्षिणकरं किल वीक्ष्य नूनम् ।
दिक्कुम्भिनो निखिलभूभरणैकदक्षं
व्रीडामवाप्य खलु पाण्डुरतां भजन्ते ॥

ग्रामा विद्वज्जनेभ्यो विविधफलभरानम्रकम्रेक्षुसस्या-
स्तीर्णास्तूर्णं तटाकास्तटवनकुसुमामोदितार्णः प्रपूर्णाः ।
देशे देशेऽब्धितुल्याः पृथुतरयशसा खानिता येन शश्व-
द्दत्ताश्चैवार्थसंघाः प्रियवचनसमं सूरिसंघेभ्य एव ॥
यात्राप्रारम्भशुम्भत्पटहपटुतरध्वानमाकर्ण्य तूर्णं
हित्वा देशां दिगन्तान्भयचकितदृशो व्याप्य यस्यारिसंघाः ।
किंस्वित्संवर्तमेघध्वनिरुत विकटप्रस्फुटत्काण्डघोषः
किं वा कल्पान्तवायुक्षुभितमिति मुहुश्चिन्तयन्तो भ्रमन्ति ॥
धर्मे धर्मजसंनिभेन जलधिस्तुल्योऽपि गाम्भीर्यतः
सन्मर्यादतया महत्त्वगुणतो रत्नाकरत्वादपि ।
क्षुभ्यत्पङ्ककलङ्ककल्मषतनुः क्षारस्वभावस्तुलां
नामोद्भासुरमूर्तिनाखिलजगत्सेव्येन येनान्वहम् ॥
नित्यालंकृतसत्पथो बुधजनप्रार्थ्योदयोऽभीष्टदो
भक्तानामतुलप्रतापमहिमव्याप्ताखिलक्ष्मातलः ।
विश्वं लोकमनश्चरैर्निजकरैः पद्माकरं नन्दय-
ञ्श्रीपृथ्वीश्वरभूपतिर्विजयते भूमण्डले सूर्यवत् ॥
माता तस्य महीयसः सुरतरुच्छायेव संसेविना-
मिष्टार्थौ ददती सती भगवते वेदान्तविद्यात्मने ।
श्रीधाम्ने नवखण्डवाडविदितं प्रोल्नाटिदेशे मुदा
विश्वस्य क्षितिमण्डलस्य तिलकं शालेयसंशोभितम् ॥
नागव्योमेन्दुरूपप्रमितशकशरन्मेषसंक्रान्तिकाले
पुण्ये पुण्यप्रवीणा विविधफलकुलालंकृतं ग्रामवर्यम् ।
श्रीपीठस्थाय शश्वच्छ्रुतिनिकरशिरोवर्तिने माधवाय
प्रादाद्भोङ्क्षितीशप्रियतरमहिषी विष्णवे जायमाम्बा ॥

शकवर्षंबुलु ११०८ गुनेण्टि मेषसंक्रान्तिनिमित्तमुन श्रीपीठापुरमुन श्रीकुन्तीमाधवदेवरकुं ब्रोलु नाटिलोनि नवखण्डवाड अनियेडि ऊरु गृहक्षेत्रारामसहितमुगानखण्डमुन्नु श्रीमन्महामण्डलेश्वरवेलनाटिकुलोत्तुङ्ग-

राजेन्द्रचोडयराजुल कोडकुलु श्रीमन्महामण्डलेश्वरकुलोत्तुङ्गमन्मगोङ्करा-
जुल महादेवुलु जायमदेवुलु हविर्बल्यर्चनार्थमुन्नित्यनैमित्तिकमासोत्सवसं-
वत्सरोत्सवार्थमुन्नु गीतनृत्तवाद्यादिविविधभोगार्थमुङ्गानाचन्द्रार्कमुगानिच्चि-
रि। तत्र स राजराजपरमेश्वरो राजपुरंदरः परममाहेश्वरः श्रीगोङ्कभूप-
प्रियतनयः समधिगतसकलशास्त्रनयः पृथ्वीश्वरदेवमहीपालः खण्डितवि-
रोधिमण्डलः प्रोलुनाटिविषयवासिनो राष्ट्रकूटप्रमुखान्सकुटुम्बिनः सर्वान्स-
माहूय मन्त्रिपुरोहितसेनापतियुवराजदौवारिकादिसमक्षमित्थमाज्ञापयति—
अस्मन्मात्रा जायममहादेव्या प्रोलुनाण्टिविषये नवखण्डवाडनामा ग्रामो गृ-
हक्षेत्रारामसहितो खण्डः श्रीपिठापुरवासिने भगवते श्रीकुन्तीमाधवदेवाय
हविर्बल्यर्चनार्थं नित्यनैमित्तिकमासोत्सवसंवत्सरोत्सवाद्यर्थं गीतनृत्त-
वाद्यादिविविधभोगार्थं च दत्त इति विदितमस्तु वः। अस्य ग्रामस्य
सीमानः पूर्वतः पेरावुगट्टु सीमा। आग्नेयत इन्दुरावसु सीमा। दक्षिणतः
सूरे गुण्डगट्टु सीमा। नैर्ऋततः डोङ्किसूडियालु सीमा। पश्चिमतः
कोम्मिनायकुचेडवु तूर्पूगट्टु सीमा। वायव्यतः वड्डविगरुवु सीमा।
उत्तरतः पुट्टलत्रोव एङ्गट्टु सीमा। ऐशतः सब्वालराविं सीमा। ई
धर्मुवुनकुनेब्बरु विघ्नमु सेसिरेनि वारु पञ्चमहापातकमु सेसिन पापमुनं
बोदुरु गं(ग)कडत वेयि गोवुलनुं वेवुरु ब्राह्मलनु बन्धिच्चिन पाप-
मुनं बोदुरु।

बहुभिर्वसुधा दत्ता बहुभिश्चानुपालिता।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम्।
षष्टिं वर्षसहस्राणि विष्ठायां जायते कृमिः॥

इति व्यासवचनाच्चायं धर्मः परिपालनीयः।

शत्रुणापि कृतो धर्मः पालनीयं प्रयत्नतः।
शत्रुरेव हि तच्छत्रुर्धर्मशत्रुर्न कस्यचित्॥

तस्मादयं धर्मः सर्वैः परिपालनीयः।